**ब्रह्मप्रज्ञा {BrahmaPrajna}**

*(A Multidisciplinary and Multilingual Peer-reviewed Journal)*

*Published by:* Vedanta Vibhag, Valmeeki Vidyapeeth,

Email: vedantavibhag@gmail.com.  ISSN: 2795-1960 (Print)

# योगवेदान्तदर्शनसम्मताष्टाङ्गयोगविवेकः

**उपप्रा. डा. उमेशप्रसादघिमिरे**

वाल्मीकिविद्यापीठम्

Email: ug2umesh@gmail.com

**शोधसार:**

*तत्त्वज्ञानसाधनन्तथात्मसाक्षात्कार एव दर्शनम्। सर्वाण्यपि वैदिकदर्शनानि खल्वात्मज्ञान एव पर्यवसितानि। बन्धहेतुभूतकर्मणामुच्छेदो दर्शनमाध्यमेनैव सम्भवति। जीवब्रह्मैक्यरूपप्रमेयगताज्ञाननिवृत्तिस्तथा स्वरूपानन्दावाप्तिश्च दर्शनप्रयोजनम्। तापत्रयनिवारणाय परमानन्दावाप्तये च दर्शनानां प्रवृत्तिः। यद्यपि पौरस्त्यदर्शनेषु तत्त्वनिर्णये विप्रतिपत्तिर्दृश्यते तथापि कतिपये साधनप्रयोजनादिविषयके सिद्धान्ते साम्यमप्यवलोक्यते। अष्टाङ्गयोगः पौरस्त्यदर्शनपरम्पराया एक सुविस्तृतः, वैज्ञानिकः, आध्यात्मिकश्च साधनामार्गो विद्यते। महर्षिपतञ्जलिना प्रणीतानि योगसूत्राणि योगदर्शनस्य मूलग्रन्थत्वेन प्रतिष्ठितानि विद्यन्ते। तत्र प्रतिपादितोऽष्टाङ्गयोगः केवलं शारीरिकव्यायाममात्रं न, अपि तु मानवजीवनस्य समग्रपरिष्कारायाध्यात्मिकविकासाय निर्दिष्टानुशासनमार्गो विद्यते। अस्मिन् शोधलेखे योगदर्शनस्य तथा वेदान्तदर्शनस्याष्टाङ्गयोगविषये पारस्परिकसम्बन्धः, अष्टाङ्गयोगस्य शास्त्रसम्मतं तात्त्विकं स्वरूपम्, तद्भेदोपभेदप्रदर्शनम्, तस्य मोक्षोपायत्वञ्च समीक्षात्मकदृष्ट्या विवेचितम्।*

***पारिभाषिकशब्दाः***– *यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणाः, ध्यानम्, समाधिः।*

## विषयपरिचय:

पौरस्त्यदर्शनपरम्परा विश्वस्य प्राचीनतमा सम्पन्ना ज्ञानपरम्परा विद्यते। अस्यां परम्परायां मानवजीवनस्य परमं लक्ष्यं दुःखनिवृत्तिपूर्विका परमानन्दरूपमोक्षावाप्तिरङ्गीक्रियते। परमपुरूषार्थभूतस्य मोक्षस्य साधनञ्चात्मसाक्षात्कारो मन्यते। आत्मतत्त्वज्ञानाय योगवेदान्तदर्शनयोर्द्वयोरेवात्यन्तमहत्त्वं विद्यते। तत्र योगदर्शनं साधनापक्षं प्रतिपादयति चेद्वेदान्तदर्शनं परमार्थतत्त्वस्य स्वरूपं सम्यङ् निरूपयति। उभयोरपि दर्शनयोर्लक्ष्यं चित्तशुद्धिद्वाराऽऽत्मसाक्षात्कार एवास्ति। अतोऽष्टाङ्गयोगस्य योगवेदान्तदर्शनदृष्ट्या समीक्षात्मकं विवेचनमत्यन्तं प्रासङ्गिकं सान्दर्भिकमुपयुक्तमौचित्यपूर्णञ्चास्ति।

## शोधसमस्या

इदानीन्तनकाले योगस्य स्वरूपं बहुधा केवलं शारीरिकव्यायामपर्यन्तमेव सङ्कुचीकृतम्। अष्टाङ्गयोगस्याध्यात्मिकः, नैतिकः, तात्त्विकश्च पक्ष उपेक्षितप्रायोऽवलोक्यते। अतो मुख्यसमस्याऽनया रीत्या प्रस्तूयते–

(क) अष्टाङ्योगस्य तात्त्विकस्वरूपं किम्?

(ख) अष्टाङ्योगविषये योगदर्शनस्य वेदान्तदर्शनस्य च परस्परसम्बन्ध: कथमवगन्तव्य:?

(ग) मोक्षसाधनेऽष्टाङ्गयोगस्य स्थानं किम्?

## शोधोद्देश्यानि

अस्याध्ययनस्य प्रमुखोद्देश्यानि अधोलिखितानि सन्ति–

(क) अष्टाङ्गयोगस्य तात्त्विकस्वरूपनिरूपणम्।

(ख) अष्टाङ्गयोगविषये योगवेदान्तदर्शनयोस्तुलनात्मकमध्ययनम्।

(ग) मोक्षसाधनरूपेणाष्टाङ्गयोगस्य समीक्षात्मकमूल्याङ्कनम्।

## शोधविधिः

शोधलेखोऽयं गुणात्मकप्रकृतिको विद्यते। शोधलेखनक्रमेऽत्र पुस्तकालयादिमाध्यमेन सङ्कलितानामष्टाङ्ग-योगसम्बद्धानां सामग्रीणां निर्मलीकरणार्थं व्यवस्थापनार्थं वा गुणात्मकविध्यनुकूला वर्णनात्मकविश्लेषणात्मकतुलनात्मक-विधयः प्रमुखतया प्रयुक्ताः सन्ति। दर्शनशास्त्रप्रतिपादितयोगसिद्धान्तं केन्द्रीकृत्य वस्तुविश्लेषणनिष्कर्षोपस्थापनादिकं कृतमिति निगमनात्मकश्चात्र विधिः स्वाभाविकतया प्रमुक्तोऽस्ति।

## पूर्वकार्यसमीक्षा

योगविषये प्राच्यैरर्वाच्यैश्च विद्वद्भिरनेकान्यनुसन्धानानि कृतान्युपलभ्यन्ते। पातञ्जलयोगसूत्रस्य प्रामाणिकं महत्त्व-पूर्णं मूलं व्याख्यानं व्यासभाष्यमस्ति। आधुनिकेष्वध्ययनेषु योगः शारीरिकस्वास्थ्यपरकः, चिकित्सापरकः सन्नपि मनो-विज्ञानपरकश्च पक्षोऽधिकतया वर्णितः, किन्तु वेदान्तदृष्ट्याऽष्टाङ्गयोगस्य मोक्षोपायत्वम्, समाधेर्ब्रह्मसाक्षात्कारसाम्यम्, योगवेदान्तयोस्तुलनात्मकसमन्वयश्चापेक्षया न्यूनतया समीक्षितः। संस्कृतभाषायामप्याधुनिकशोधद्धत्यनुसारं समग्र-समीक्षात्मकमध्ययनं दुर्लभमेवास्ति।

## शोधरिक्तता

योगविषयेऽनेकान्यध्ययनानि सम्पन्नानि किन्तु विविधेषु शोधकार्येष्वष्टाङ्गयोगस्य केवलं स्वास्थ्यपरकः पक्षो विवेचितः। वेदान्तदृष्ट्या योगस्य मोक्षसाधनरूपता, योगवेदान्तयोरन्तर्सम्बन्धः, आध्यात्मिकमनोविज्ञानात्मकता च पर्याप्त-रूपेण नैव विवेचिता। विशेषतः संस्कृतभाषायामाधुनिकशोधपद्धत्यनुसारं समन्वितं समीक्षात्मकमध्ययनं दुर्लभम्। अतोऽयं शोधलेखस्तस्य रिक्तस्थानस्य पूर्त्यर्थं सफलोऽस्ति।

## शोधसीमा

अस्य शोधलेखस्य सीमा पातञ्जलयोगदर्शनसम्मतमष्टाङ्गयोगविवेचनमस्ति। हठयोगतन्त्रयोगनव्ययोगानां पद्धतयश्चास्मिन् लेखे नैव विस्तरेणोल्लिखिताः। वेदान्तदृष्ट्यात्र प्रधानतयाऽद्वैतवेदान्तस्यैव विचारो विहितोऽस्ति। अध्ययनस्याधारभूतग्रन्थाः– योगसूत्रम्, व्यासभाष्यम्, वेदान्तसारः, श्रीमद्भगवद्गीता, प्रमुखोपनिषदश्च विद्यन्ते।

## सैद्धान्तिक आधारः

योगदर्शनं खलु पौरस्त्यास्तिकषड्दर्शनान्तर्गतं वैदिकं दर्शनमस्ति। अस्य दर्शनस्य प्रवर्तको महर्षिपतञ्जलिरस्ति। यद्यपि योगस्य चर्चा पातञ्जलयोगसूत्रग्रन्थादन्येष्वपि-उपनिषद्-घेरण्डसंहिता-याज्ञवल्क्यसंहिता-पराशरसंहिता-गोरक्ष-संहिता-श्रीमद्भगवद्गीता-वेदान्तप्रकरणग्रन्थेषु प्राप्यते तथापि तेषु ग्रन्थेषु व्यवस्थितरूपेण विरचितः 'पातञ्जलयोगसूत्रम्' इति ग्रन्थः प्रामाणिको मन्यते। योगदर्शनस्य मूललक्ष्यं चित्तवृत्तिनिरोधद्वारा पुरूषस्य स्वरूपावस्थानमस्ति चेद्वेदान्त-दर्शनस्यापि परमं लक्ष्यमात्मतत्त्वस्यानुभूतिरस्ति। योगदर्शनं विशेषतश्चित्तशुद्धेरावश्यकं साधनं सम्यक् प्रतिपादयति चेद्

वेदान्तदर्शनमात्मज्ञानद्वारा परमपुरूषार्थभूतमोक्षस्वरूपं प्रतिपादयति। अतो योगः केवलं ध्यानमात्रं न, अपि तु जीवनस्य समत्वपूर्णं, संयमितं, जागरूकञ्चाचरणम्। वेदान्तेऽनुभूतिसाधनरूपेण योगस्यापरिहार्यत्वमङ्गीकृतमवलोक्यते। अतो यद्यप्यत्र योगसूत्रं प्रामाणिकत्वेनाङ्गीकृत्याष्टाङ्गयोगानां विवेचनं विधीयते तथापि पौरस्त्यवाङ्मयान्तर्गतवेदोपनिषत्श्रीमद्-भगवद्गीतादिमूलशास्त्रप्रतिपादितान् योगसिद्धान्तान् समाश्रित्यात्र सामग्रीसङ्कलनन्तथाऽध्ययनविश्लेषणादिकञ्च विहित-मिति योगसिद्धान्तसम्बद्धः पौरस्त्यवाङ्मय एवास्य शोधलेखस्य सैद्धान्तिकाधारोऽस्ति। तत्रापि दर्शनसम्बद्धविषयकत्वात् पौरस्त्यास्तिकयोगवेदान्तदर्शनद्वयावलम्बिताष्टाङ्गयोगसिद्धान्त एवास्याध्ययनस्य सैद्धान्तिक: पर्याधारो विद्यते।

## विषयोपक्रमः

विविधासूपनिषत्सु, श्रीमद्भगवद्गीतायाम्, शिवसंहितायाम्, घेरण्डसंहितायाम्, हठयोगप्रदीपिकाम्, बृहद्हठयोग-सोपाने, याज्ञवल्क्यसंहितायाम्, पातञ्जलयोगसूत्रेषु च योगास्याष्टाङ्गयोगस्य च विस्तृणा चर्चा समुपलभ्यते। जीव-परमात्मानोरैक्यानुभूतिरेव योगस्य परमोपलब्धिरस्ति। स्वस्वरूपावस्थितिर्वा योगस्य परमं प्रयोजनम्। तथा च सूत्रितम्– 'तदा द्रष्टु: स्वरूपेऽवस्थानम्' (योगसूत्रम् १/२)। शारीरिकमानसिकस्वास्थ्यलाभाय, समत्वबुद्धिविकासाय, बुद्धिशक्ति-समृद्धये, स्मरणशक्तिसम्वृद्धये, परमानन्दावाप्तये चार्षपरम्परायां लोकल्याणमिच्छुकैर्महर्षिभिर्योगविद्या प्रवर्धिता प्रचारिता च। बाह्यभौतिकलाभायान्तरमानसलाभाय च तैर्मनीषिभिरष्टाङ्गयोग: प्रतिपादितो व्याख्यातश्च। तानि चाष्टाङ्गानि सन्ति- यम:, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिश्च। यमेन जनो निषिद्धकर्मण: सुरक्षितो भवति, नियमेन पुण्यकर्मणि प्रवृत्तो भवति, आसनेन शरीरं निरामयं भवति, प्राणायामेन मनः शान्तं भवति, प्रत्याहारेणेन्द्रियाण्यन्त-र्मुखानि भवन्ति, धारणयैकाग्रशक्तिर्वर्धते, ध्यानेन चितशुद्धिस्तथेष्टप्राप्तिर्भवति, समाधिना चानन्दानुभूतिर्भवति। इत्थ-मष्टाङ्गयोगसाधनया व्यक्ते: सामाजिकं वैयक्तिकञ्च जीवनं सुन्दरं भवति तथा शरीरेन्द्रियचित्तशुद्धिद्वारा मोक्षलाभो भवतीति पौरस्त्यदर्शनानां डिण्डिमघोषः। यद्यपि योगदर्शनाभिहितस्य समाधेस्तथा वेदान्तदर्शनाभिहितस्य मोक्षस्य न कोऽपि भेदस्तथापि स्थितिरियं यौगिकक्रियाजन्या ब्रह्मविद्याजन्येति सैद्धान्तिकी भिन्नतैवावलोक्यते। मोक्षसमाध्योरेकता-विषये कथयति च याज्ञवल्क्यो मुनि:– 'समाधिः समतावस्था जीवस्य परमात्मन:। ब्रह्मण्येव स्थितिर्या सा समाधि: प्रत्यगा-त्मनः॥' (याज्ञवल्क्यसंहिता– १०/२) निरतिशयत्वे सति क्षयशून्यत्वान्मोक्षस्य समाधेर्वा परमपुरूषार्थत्वम्। तस्य च परम-पुरूषार्थस्य साधनरूपाणामष्टाङ्गयोगानां स्वरूपप्रतिपादनमेवास्य शोधलेखस्य लक्ष्यमुद्देश्यं प्रयोजनं वैशिष्ट्यञ्चास्ति।

## अष्टाङ्गयोगस्वरूपविवेचनम्

वेदान्तदर्शने ज्ञानसाधनत्वेन श्रवण-मनन-निदिध्यासनानां चर्चाक्रमे निदिध्यासनं समाधिपदेनाप्यभिहितम्। तथा चोक्तम्– 'श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम्।' (वेदान्तसारः ६०, पृ.१९२), 'मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम्। विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजा-तीयप्रत्ययप्रवाहो निदिध्यासनम्। समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति। तत्र सविकल्पको नाम ज्ञातृज्ञानादि-विकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्।' (वेदान्तसार: ६१, पृ.१९८), 'निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्। तदा तु जलाकारा-कारितलवणानवभासेन जलमात्रावाभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते।' (वेदान्तसार: ६२, पृ.२०२), निर्विकल्पसमाधिदशायां ज्ञातृज्ञानज्ञेयानां त्रिपुटीनां समाप्तिर्भवति। ज्ञेयेन सहाखण्डाकारा-कारिता चित्तवृत्तिरभिन्ना भवति सर्वथा। तदा केवलं ज्ञेयस्यैकस्य बोधोऽवशिष्यते। तथा चोक्तं विद्यारण्यमुनिना–

**ध्यातृध्याने परित्यज्य क्रमाद् ध्येयैकगोचरम्। निवातदीपवच्चित्तं समाधिरभिधीयते॥**

**यथा दीपो निवातस्थ इत्यादिभिरनेकधा। भगवानिममेवार्थमर्जुनाय न्यरूपयत्॥** (पञ्चदशी १/५५,५८)

यदा ध्यातारं ध्यानञ्च परित्यज्य ध्येयैकगोचरं भवति तदेव समाधिपदवाच्यम्। वायुशून्ये क्षेत्रे वर्तमानो दीपो यथा निश्चलो भवति तद्वन्निश्चलं मनो भवतीत्याशयः। एवं 'यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता' (श्रीमद्भगवद्गीता ६/१९) इत्यादिश्लोकैरनेकधा ज्ञानैश्वर्यादिसम्पन्नो भगवान् श्रीकृष्ण इममेव निर्विकल्पकसमाधिरूपात्मकमर्थमर्जुनाय निरूपितवान्। विद्यारण्यमुनिना निर्विकल्पकसमाधेर्योगदर्शनोक्तधर्ममेधसमाधिना सहैक्यमुपस्थापितं यथा–

**अनादाविह संसारे सञ्चिताः कर्मकोटयः। अनेन विलयं यान्ति शुद्धो धर्मो विवर्धते॥**

**धर्ममेधमिमं प्राहु समाधिं योगवित्तमाः। वर्षत्येष यतो धर्मामृतधाराः सहस्रशः॥** (पञ्चदशी १/५९-६०)

अर्थादस्मिन् संसारे पुण्यापुण्यलक्षणकर्माणि समाधिनानेन विनश्यन्ति। 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' (मुण्डकोपनिषद् २/२/८) इति श्रुतेः, 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरूते तथा' (श्रीमद्भगवद्गीता ४/३७ ) इति स्मृतेश्च। तथा चोक्तं श्रीरामकृष्णेन– 'शुद्धो धर्मः सविलासाऽविद्यानिवर्तक साक्षात्कारसाधनभूतो धर्मो विवर्धते।' (पञ्चदशी १/५९ : श्रीमद्रामकृष्णप्रणीतव्याख्या, पृ.३५) अर्थात् समाधेर्फलं द्विविधम्– मुख्यं गौणञ्च। मुख्यफलं खल्वात्मसाक्षात्कारो विद्यते चेद् गौणफलं पुण्यपापविनाश एव। एवञ्च जीवब्रह्मैक्यज्ञानवन्तो योगवित्तमा इमं निर्विकल्पकं समाधिं धर्ममेधं कथयन्ति। यतो ह्ययं समाधिरसङ्ख्या अमृतधारा वर्षति, तस्मात् कारणात् समाधिः खलु धर्ममेध इत्युच्यते। उक्तञ्च यथा– 'स्नातं तेन समस्ततीर्थसलिलैः सर्वाऽपि दत्तावनिर्यज्ञानां च कृतं सहस्रमखिला देवाश्च सम्पूजिताः।' समाधेरिदं लक्षणं सुषुप्तावतिव्याप्तमिति तु नैवाशङ्कनीयम्, यतो हि सुषुप्तावस्थायामन्तःकरणमज्ञाने लीनं भवति परन्तु समाधिदशायां चित्तवृत्तीनां निगृहीतत्त्वेनाऽभानेऽपि तदस्तित्वं भवत्येव। समाधौ वृत्तीनामनुपलब्धौ ध्येयैकगोचरत्वमपि निश्चेतुं कथं शक्यते? इत्याशङ्कायां विद्यारण्येन समाधानं यथा प्रदर्शितम्– 'वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः। स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात्॥' (पञ्चदशी १/५६) अर्थान्निर्विकल्पसमाधिकालेऽन्तःकरणं ब्रह्मरूपेणावतिष्ठति। तत्र ब्रह्मभिन्ना वृत्तिरेव न भवति। केवलमखण्डब्रह्ममात्रमवभासते, एतदेव ध्येयैकगोचरमित्युच्यते। तस्मिन् च काले प्रमातुरेव पृथगस्तित्वाभावे वृत्तिरज्ञा भवतीत्यङ्गीक्रियते तथापि समाधेरुत्थितस्यात्मनः स्मरणात् 'एतावन्तं कालमहं समाहितोऽभूवम्' इत्येवंरूपात् वृत्तयोऽनुमीयन्ते। यद्यत् स्मर्यते तत्तदनुभूतमिति नियमेन स्मरणस्यानुभवपूर्वकत्वं सिद्ध्यति। वेदान्तदर्शने श्रवणान्मननं श्रेष्ठम्, मननान्निदिध्यासनं श्रेष्ठम्, निदिध्यासनाच्च निर्विकल्पकं श्रेष्ठं मन्यते। तथा चोक्तं शङ्कराचार्येण– 'श्रुतेः शतगुणं विद्यान्मननं मननादपि। निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्॥' (विवेकचूडामणिः ३६५) एवं निर्विकल्पसमाधेः स्वरूपमुपदर्श्य तदङ्गत्वेनाष्टाङ्गयोगो वेदान्तदर्शनेऽङ्गीकृतोऽस्ति– 'अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः।' (वेदान्तसारः ६३, पृ.२०६) एतान्येव पतञ्जलिमुनिना योगाङ्गत्वेन समुपदिष्टानि सन्ति यथा– 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि।' (योगसूत्रम् २/२९) एतेनाद्वैतवेदान्ते योगदर्शनसम्मता साधनप्रक्रिया पूर्णरूपेण ग्राह्या विद्यत इति सिद्ध्यति। अर्थाद्योगदर्शनैकदेशे साधनप्रक्रियामते वा वेदान्तदर्शनस्यैकमत्यमवलोक्यते। अष्टाङ्गयोगविषयेऽत्र तात्त्विकी समीक्षा क्रियते।

## १ यमः

यमस्यार्थो भवति संयमः। योगदर्शने 'अहिंसादय एव यमपदवाच्या भवन्ति। एते चान्तःकरणवृत्तिरूपाः। तथा च यमस्वरूपं शङ्कराचार्येण यथा प्रदर्शितम्– 'सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः। यमोऽयमिति सम्प्रोक्तोऽभ्यसनीयो मुहुर्मुहुः॥' (अपरोक्षानुभूतिः १०४) सर्वं खल्विदं ब्रह्मेत्यैक्यज्ञानेन सर्वेन्द्रियाणां नियन्त्रणमेव यमपदवाच्यम्। 'वासुदेवः सर्वमिति भावनयाऽहिंसादिरूपयमस्य परिपालनं कर्तव्यं मुमुक्षुभिर्योगिजनैर्वा। पतञ्जलिना पञ्चविधा यमाः सूत्रिताः– 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।' (योगसूत्रम् २/३०) अर्थात् १. अहिंसा, २.सत्यम्, ३.अस्तेयम्, ४.ब्रह्मचर्यम्, ५.अपरिग्रहश्च।

## १.१ अहिंसा

सर्वथा सर्वदा सर्वभूतानामनभिद्रोह एवाहिंसा। तदुक्तम्– 'अहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः।' (योगसूत्रम् २/३० : व्यासभाष्यम्) 'मा हिंस्यात् सर्वा भूतानि' इति स्मृतेश्च। कस्यापि हिंसा नैव कर्तव्येत्यहिंसायास्तात्पर्यम्। शरीरेण वाचा मनसापि कस्यापि पीडनाभाव एवाहिंसेति ज्ञातव्यम्।

## १.२ सत्यम्

यथार्थभाषणमेव सत्यमित्युच्यते। परीक्षणपूर्वकं सर्वभूतहितं सत्यं मुमुक्षुणा ब्रूयात्। योगसूत्रस्य व्यासभाष्ये सत्यस्य निरूपणं यथा कृतम्– 'सत्यं यथार्थे वाङ्मनसे, यथा दृष्टं यथानुमितं यथा श्रुतं तथा वाङ्मनश्चेति। परत्र स्वबोधसङ्क्रान्तये वागुक्ता, सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्तिवन्ध्या वा भवेदिति। एषा सर्वभूतोपकारार्थं प्रवृत्ता, न भूतोपघाताय। यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यान्न सत्यं भवेत्, पापमेव भवेत्। तेन पुण्याभासेन पुण्यप्रतिरूपकेण कष्टं तमः प्राप्नुयात्। तस्मात्परीक्ष्य सर्वभूतहितं सत्यं ब्रूयात्।' (योगसूत्रम् २/३० : व्यासभाष्यम्) मुमुक्षुभिर्कदापि सत्यमेव ब्रूयात् नैवासत्यं ब्रूयात्। तथा च स्मृतिरपि– 'सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्। प्रियञ्च नानृतं ब्रूयादेष धर्मः सनातनः॥' (मनुस्मृतिः ४/१३८) अर्थात् 'सत्यं वद' इत्युपनिषदादेशो मुमुक्षुभिः पूर्णतया पालयितव्यो भवति।

## १.३ अस्तेयम्

परद्रव्यस्यापहरणमेव स्तेयम्, तदभावोऽस्तेयम्। तथा चोक्तम्– 'स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्, तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति। (पातञ्जलयोगसूत्रम् २/३० : व्यासभाष्यम्, पृ.२४३) अपहरणमेव न स्तेयमपि तु परद्रव्यापहरणेच्छापि स्तेयमेव। अतः कायेन वाचा मनसा च परद्रव्याणामपहरणं नैव कर्तव्यमित्यस्तेयस्य तात्पर्यम्।

## १.४ ब्रह्मचर्यम्

इन्द्रियाणां संयमनमेव ब्रह्मचर्यम्, तत्रापि जननेन्द्रियस्य नियन्त्रणमेव ब्रह्मचर्यमित्युच्यते। तथा चोक्तम्– 'ब्रह्मचर्यं गुप्तेन्द्रियस्य संयमः।' (पातञ्जलयोगसूत्रम् २/३० : व्यासभाष्यम्, पृ.२४३) स्त्रीपुरूषयोः सहवासः, यौनसम्पर्क एव वा नैवाब्रह्मचर्यमपि तु वनिताङ्गचिन्तनम्, स्तनाद्यङ्गस्पर्शनम्, रागपूर्वकदर्शनञ्च ब्रह्मचर्यविपरीतं कार्यम्। एवञ्च यौनविषयकं सम्भाषणमपि ब्रह्मचर्योपघातकमस्ति। अष्टप्रकारकाणां मैथुनानां परित्याग एव ब्रह्मचर्यमिति ग्रन्थान्तरे प्रदर्शितं यथा– 'ब्रह्मचर्यं सदा रक्षेदष्टधालक्षणं पृथक्। स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्॥ सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्॥' (दक्षसंहिता,अध्यायः ७ इति वेदान्तसारस्य तत्त्वपारिजातव्याख्यायां समुद्धृतम्, वेदान्तसारः ६३, पृ.२०९) एतदेव रामतीर्थेनापि यतिना स्वीकृतम्– 'ब्रह्मचर्यमष्टाङ्गमैथुनवर्जनम्।' (तत्रैव, विद्वन्मनोरञ्जनी टीका) व्यासेनापि ब्रह्मचर्यलक्षणं यथोक्तम्– 'कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा। सर्वत्र मैथुनत्यागो ब्रह्मचर्यं प्रचक्षते॥' (गरुड. पूर्व. आचार. २३८/६ इति वेदान्तसारस्य तत्त्वपारिजातव्याख्या, पृ.२०९) एवमुपस्थेन्द्रियस्य संयमेनाष्टविधमैथुनानां परित्यागपूर्वकं वीर्यसुरक्षणमेव ब्रह्मचर्यमित्यवज्ञायते।

## १.५ अपरिग्रहः

विषयमात्रस्यासङ्ग्रह एवापरिग्रह इत्युच्यते। रामतीर्थेन वेदान्तसारस्य टीकायामुल्लिखितञ्च-'समाध्यनुष्ठानानुपयुक्तस्य वस्तुमात्रस्यासङ्ग्रहोऽपरिग्रहः।' (वेदान्तसारः ६३, विद्वन्मनोरञ्जनी) एवञ्च व्यासेनापि योगभाष्ये लिखितञ्चैतदेव– 'विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रहः।' (पातञ्जलयोगसूत्रम् २/३० : व्यासभाष्यम्, पृ. २४३) एतदर्थसम्बन्धे प्रसिद्धा चेयं सूक्तिः– 'अर्थानामर्जने दुःखं तथा च परिपालने। नाशे दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः॥' (पञ्चतन्त्रनीतिः) एवञ्चाचार्येण शङ्करेणापि प्रोक्तं यत्– 'अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्। पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः॥' (द्वादशपञ्जरिकास्तोत्रम् २) एतेन दोषबहुलत्वाद् विषयाणां

सङ्ग्रहो मुमुक्षुभिर्नैव कर्तव्य इति ज्ञायते। विषयाणां सङ्ग एव क्लेशकारको भवति। अतो विषयेषु राग एव न कर्तव्यः। यमाख्यस्य योगाङ्गस्य विषये विष्णुपुराणे भगवता व्यासेन यथा चोल्लिखितम्– 'ब्रह्मचर्यमहिंसा च सत्यास्तेयापरिग्रहान्। सेवेत योगी निष्कामो योग्यतां स्वं मनो नयन्॥' (विष्णुपुराणम् ६/७/३६ इति सर्वदर्शनसङ्ग्रहे पातञ्जलदर्शनम् पृ.६१३) एवं वेदान्तदर्शने योगदर्शने च यमाख्यं योगाङ्गं महत्त्वपूर्णं नैतिकसाधनमङ्गीक्रियते।

## २. नियमः

योगदर्शने द्वितीययोगाङ्गत्वेन नियमः स्वीकृतोऽस्ति। सदाचारपरिपालनमेव नियमपदाभिधेयम्। नियमस्य सम्बन्ध आचरेण सहास्ति। सम्यगाचरणादेव संयमः समुत्पद्यते। संयमितजीवनेनैव समाधिस्थितिरवाप्यते। तत्रायं नियमोऽपि यमवत् पञ्चविध एवाङ्गीकृतोऽस्ति– 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।' (पातञ्जलयोगसूत्रम् २/३२) व्यासेनापि नियमस्य पञ्चविधत्वं समुपदिष्टम्– 'स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्। कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः॥' (विष्णुपुराणम् ६/७/३७) एवञ्चात्र नियमभेदानां शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानां संक्षेपेण पृथक् चर्चा विधीयते।

## २.१ शौचम्

बाह्यान्तरशुद्धिरेव शौचपदेनावज्ञायते। तथा चोक्तम्– 'शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्॥' (याज्ञवल्क्यगीता १/६९ इति वेदान्तसारस्य तत्त्वपारिजातव्याख्या पृ.२११) शरीर-शुद्धीकरणं बाह्यशौचञ्चेच्चित्तशुद्धीकरणमान्तरं शौचम्। तथा च व्यासस्य भाष्यमत्रावलोकनीयम्– 'तत्र शौचं मृज्जलादि-जनितं मेध्याभ्यवहरणादि च बाह्यम्। आभ्यन्तरं चित्तमलानामाक्षालनम्। (पातञ्जलयोगसूत्रम् २/३२ : व्यासभाष्यम्, पृ.२५०) चित्तस्य शान्तये बाह्यशौचस्यावश्यकता भवति। शरीरादिमालिन्येऽन्तःकरणमपि मलिनं भवति। अतो बाह्य-शौचस्याप्यावश्यकत्वमङ्गीक्रियते। कामक्रोधलोभमोहमात्सर्यादिकमन्तःकरणस्य मलमस्ति। मात्सर्यादिप्रक्षालन-मेवान्तरं शौचमस्ति। अतो बाह्यशौचेनान्तःकरणस्य शुद्धिर्भवति। बाह्यशौचे सति मनः प्रसन्नं भवति। मनप्रसादेनैकाग्रता-ऽऽगच्छति। एकाग्रतायां सत्यामिन्द्रियाणि वशीभूतानि भवन्ति, इन्द्रियवशेन चात्मसाक्षात्कारयोग्यता समुत्पद्यते। अतो मुमुक्षुणा योगिना वा शौचाचरणमवश्यं कर्तव्यम्।

## २.२ सन्तोषः

सम्यक् तोष एव सन्तोषः। सन्तुष्टिरेव सन्तोषः। रामतीर्थेन प्रोक्तम्– 'सन्तोषो यदृच्छालाभसन्तुष्टिरलाभे चाविषादः।' (वेदान्तसारः ६३, विद्वन्मनोरञ्जनी) अत एवोच्यतेऽन्यत्रापि- 'प्राप्तेन सन्तुष्यताम्।' भगवता श्रीकृष्णेनापि यतेः स्वरूपमुपदिष्टञ्च यथा- 'यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः। समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥' (श्रीमद्भगवद्गीता ४/२२) यदृच्छालाभसन्तुष्टपदस्य व्याख्या शङ्कराचार्येण यथा कृता– 'यदृच्छालाभसन्तुष्टः– अप्रार्थितो-पनतो लाभो यदृच्छालाभः, तेन सन्तुष्टः सञ्जातालम्प्रत्ययः।' (श्रीमद्भगवद्गीता ४/२२ : शाङ्करभाष्यम्, पृ.२३२) अर्था-दप्रार्थनया प्राप्त एव यदृच्छालाभोऽस्ति। शरीरे आत्माभिमानाभावाच्छरीरधारकान्नादिलाभेन यतेर्न हर्षः, तदलाभेन च नैव विषादः। भगवता व्यासेनापि योगसूत्रस्य भाष्ये लिखितञ्च– 'सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा।' (पातञ्जलयोगसूत्रम् २/३२ : व्यासभाष्यम्, पृ.२५०) योगसूत्रकारेण पतञ्जलिनापि 'सन्तोषदानुत्तमसुखलाभः।' (योगसूत्रम् २/४२) सन्तोषात् परमं सुखमन्यन्नास्ति। सन्तोषं परमं सुखमिति च सूक्तिः प्रसिद्धाऽस्ति। तथा चोक्तं व्यासेनैव– 'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्। तृष्णाक्षय सुखस्यैते नार्हतः षोडशीं कलाम्॥' (महाभारतम्, शान्तिपर्व १७४/४६) स्वर्गीयं सुखमपि तृष्णाक्षयजनितात् सुखान्निकृष्टम्। तृष्णाक्षयजन्यसुखस्य षोडशभागतुल्यत्वमपि स्वर्गादिसुखस्य न भवति। अतो मुमुक्षुभिर्यतिजनैर्वा सन्तोषः कर्तव्य इत्याशयः।

## २.३ तपः

स्वधर्मानुष्ठानेऽशनापिपासाशीतोष्णादिकष्टसहनमेव तपः। योगभाष्ये कृच्छ्रचान्द्रायणादिव्रतानुष्ठानमपि तप इत्युक्तम्, तथा हि– 'तपो द्वन्द्वसहनम्, द्वन्द्वश्च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च। व्रतानि चैव यथायोगं कृच्छ्रचान्द्रायणसान्तपनादीनि।' (पातञ्जलयोगसूत्रम-२/३२ : व्यासभाष्यम्, पृ.२५०) 'तपो नानशनात्परम्' (महानारायण्युपनिषद् २१/२) इति श्रुतेश्च अनशनमेव परं तपः। भोग्यस्याभोग एव तप इत्यवज्ञायते। चान्द्रायणादिव्रतानां तपस्त्वं रामतीर्थेन नैवाङ्गीकृतम्, यथा– 'सर्वथा तु नात्र चान्द्रायणादिः तपः शब्दार्थस्तस्य समाधिविरोधादिति द्रष्टव्यम्।' (वेदान्तसार: ६३, विद्वन्मनोरञ्जनी) चान्द्रायणादिव्रतानुष्ठानाद् धातुषु वैषम्योत्पन्नत्वेन समाधिना सह चान्द्रायणादेर्विरोधः। धातुवैषम्ये सति सम्यग्रूपेण योगाभ्यासो न भवतीत्याशयः। युक्ताहारविहारस्यैव योगो भवतीति भगवता श्रीकृष्णेनाप्युपदिष्टम्– 'युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु। युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥' (श्रीमद्भगवद्गीता ६/१७) तथा चाचार्यशङ्करस्य भाष्यम्– 'कथं पुनर्योगो भवतीत्युच्यते-युक्तेति। युक्ताहारविहारस्य– आह्रियत इत्याहार:– अन्नम्, विहरणं-विहार: पादक्रमः तौ युक्तौ नियतपरिमाणौ यस्य सो युक्ताहारविहारः तस्य, तथा युक्तचेष्टस्य युक्ता-नियता चेष्टा यस्य कर्मसु तस्य तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्चावबोधश्च तौ नियतकालौ यस्य तस्य, युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति 'दुःखहा– दुःखानि सर्वाणि हन्तीति दुःखहा। सर्वसंसारदुःखक्षयकृद् योगो भवतीत्यर्थः॥' (श्रीमद्भगवद्गीता ६/१७, शाङ्करभाष्यम्, पृ. ३१९) एतेन योगी खल्वत्यन्तमाहाररहितः सर्वथागमनरहितश्च नैव भवेत्, युक्ताहारविहारस्यैव योग: सिद्धो भवतीति गीताशयो विद्यते। अर्थान्न केवलमाहाररहितो गमनरहितश्च स्यात्, नाप्यतिमात्रमाहारवान् सञ्चारवान् स्यादित्यर्थः। मनुना पापविनाशाय क्रियमाणानि प्रायश्चित्तव्रतादीन्यपि तप एव कथितं यथा– 'यत्किञ्चिदेन: कुर्वन्ति मनोवाङ्मूर्तिभिर्जना:। तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः॥' (मनुस्मृति: ११/२४१) शङ्कराचार्येण 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः।' (उपदेशसाहस्री १७/२४) इन्द्रियसहितस्य मनस ऐकाग्र्यमेव परमं तप इत्यङ्गीकृतम्। भगवता व्यसेनापि 'मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं निश्चितं तप:' (महाभारतम् ३/२६०/२५) इत्युक्त्यैकाग्र्यमेव तप इति निश्चितमस्ति। श्रीमद्भगवद्गीतायां शारीरिकवाचिकमानसिकभेदेन त्रिविधं तपः समुपदिष्टं यथा– 'देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्। ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ मनः प्रसादसौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत् तपो मानसमुच्यते॥' (श्रीमद्भगवद्गीता १७/१४-१६) देवद्विजादिपूजनादिकं शरीरेणैव क्रियत इति शारीरं तप उच्यते। 'देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञा:, तेषां पूजनं देवद्विजगुरुप्राज्ञपूजनम्, शौचम्,आर्जवम्-ऋजुत्वम्, ब्रह्मचर्यम्, अहिंसा च शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वै एव कार्यकरणै:, कर्त्रादिभिः साध्यं शारीरं तप उच्यते। 'पञ्चैते तस्य हेतव:' (श्रीमद्भगवद्गीता १८-१५) इति हि वक्ष्यति।' (श्रीमद्भगवद्गीता १७/१४ : शाङ्करभाष्यम्, पृ.८३१) एवञ्चानुद्वेगकरं सत्यं प्रियहितञ्च यद्वाक्यं तत्, स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप इत्युच्यते। एवमेव च मनः प्रसाद:, सौम्यत्वम्, मौनम्, मनोनिग्रहः, भावसंशुद्धिरित्येतत् तपो मानसमुच्यते। पुनश्च सात्त्विकराजसतामसभेदात् तपस्त्रिविधमित्यपि भगवतोपदिष्टम्– 'श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः। अफलाकाङ्क्षिभिर्युक्तैः सात्विकं परिचक्षते॥ सत्कारमानपूजार्थं तपो दम्भेन चैव यत्। क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥ मूढग्राहेणात्मनो यत् पीडया क्रियते तपः। परस्योत्सादनार्थं वा तत् तामसमुदाहृतम्॥' (श्रीमद्भगवद्गीता १७/१७-१९) परया श्रद्धया तप्तं तपस्त्रिविधं भवति। तत्राफलाकाङ्क्षिभिर्युक्तैस्तप्तं तप: सात्त्विकं परिचक्षते। अर्थात् फलाभिसन्धिरहितं योगयुक्तं तप: सात्त्विकमित्युच्यते। सत्कारमानपूजार्थं दम्भेन यत् तप: क्रियते तच्चलमध्रुवं तप: राजसं लोके प्रोक्तम्। मया तपसि कृते सति जनाः तपस्विनं मां मत्वा सत्कारमानपूजा: कुर्युरिति बुद्ध्या धार्मिकोऽहमिति प्रख्यापनार्थं च यत् तप: क्रियते तद्राजसमित्यर्थ:। मूढग्राहेणात्मन: पीडया परस्योत्सादनार्थं वा यत् तपः क्रियते तत्

तामसमुदाहृतम्। मुढैरविवेकनिश्चयेन समनुष्ठितं स्वशरीरेन्द्रियादिपीडकं परनाशफलकञ्च तपः तामसमित्यर्थोऽवगम्यते। मनुमहाराजेन लोकेऽस्मिन् यद् दुस्तरं दुर्लभं दुर्गमं दुष्करञ्चास्ति तत्सर्वं तपसा साध्यमस्तीति समुद्घोषितं यथा– 'यद् दुस्तरं यद्दुरापं यद् दुर्गं यच्च दुष्करम्। सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमम्॥' (मनुस्मृतिः ११/२३८) एवं योगाङ्गेषु विशिष्टमङ्गं तपोऽस्तीति पौरस्त्यवेदान्तयोगदर्शनमतम्।

## २.४ स्वाध्यायः

'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' (तैत्तिरीयोपनिद् १/११/१) इति श्रुतेश्चास्माभिः कदापि स्वाध्याये प्रवचने च प्रमादो नैव कर्तव्य इत्यवज्ञायते। 'स्वाध्यायः– मोक्षशास्त्राणामध्ययनं प्रणवजपो वा।' (पातञ्जलयोगसूत्रम् २/३२ : व्यासभाष्यम्, पृ.२५०), 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत्॥' (मुण्डकोपनिषद् २/२/४) प्रणवादिपवित्रमन्त्राणां जपः, मोक्षशास्त्राणामध्ययनं वा स्वाध्याय इत्युच्यते। तथा च श्रुतिरपि 'ओमित्येवं ध्यायथ आत्मानम्।' (मुण्डकोपनिषद् २/२/६) 'युञ्जीत प्रणवे चेतः प्रणवं ब्रह्म निर्भयम्।' (माण्डूक्यकारिका १/१५) इति च। मनुनापि जपस्योत्तरोत्तरं वैशिष्टमङ्गीकृतं यथा– 'विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः॥' (मनुस्मृतिः २/८५) अर्थाद् दर्शपौर्णमासादिविधियज्ञाज्जपयज्ञो दशभिर्गुणैर्विशिष्टो-ऽस्ति, उपांशुजप: शतगुणो मन्यते, मानसश्च जपः सहस्रगुणः स्मृयते। एवमेव योगशास्त्रे स्वाध्यायस्य विशिष्टं महत्त्वमुपपादितञ्च– 'स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमामनेत्। स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते॥' (विष्णुपुराणम् ६/६/२ : समुद्धृतम्-योगभाष्यम् १/२८, पृ.८४) स्वाध्याद् योगाभ्यासः, योगात् स्वाध्यायाभ्यासः कर्तव्यः, स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते। स्वाध्यायस्य महत्त्वमुपयोगित्वञ्च प्रकाशयता योगभाष्यकारेण व्यासमुनिना वैयासिकी सूक्तिर्यथोक्ता– 'स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमामनेत्। स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते। (योगभाष्यम् १/१८) अर्थाज्जपरूपस्वाध्यायाद् योगस्याभ्यासः कर्तव्यः, मनोयोगेन च जपाभ्यास: कर्तव्यः। जपाद् योगस्योत्कर्षे योगाज्जपस्य चोत्कर्षे साधकस्य कृते परमात्मा प्रकाशते। महर्षिः पतञ्जलिः सूत्रयति च– 'स्वाध्यायादिष्ट-देवतासम्प्रयोगः।' (योगसूत्रम् २/४४) अर्थात् नित्यरूपेण भावनापूर्वकेण च जपानुतिष्ठते स्वाध्यायरताय वा साधकाय देवर्षिसिद्धा अभीष्टदर्शनं प्रयच्छन्ति। अतो योगदर्शने वेदान्तदर्शने च स्वाध्यायस्यातीव महत्त्वमङ्गीक्रियते।

## २.५ ईश्वरप्रणिधानम्

ईश्वरार्पणबुद्ध्या कर्मानुष्ठानं कर्तव्यम्। सर्वेषां कर्मणामीश्वरेऽर्पणमेवेश्वरप्रणिधानमुच्यते। तथा चोक्तं व्यासेन 'ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणम्।' (योगसूत्रम् २/३२ : योगभाष्यम्, पृ.२५०) सर्वकर्मणामीश्वरेऽर्पणं तत्फलसन्न्यासो वेश्वरप्रणिधानमस्ति। तथोपदिष्टं श्रीकृष्णेनापि– 'यत्करोषि यदश्नासि यज्जुहोसि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरूष्व मदर्पणम्॥' (श्रीमद्भगवद्गीता ९/२७) समस्तानां कर्मफलानां भोक्ता परमेश्वर एवास्तीति समुपदिष्टम्– 'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥' (श्रीमद्भगवद्गीता ५/२९) परमेश्वरस्य मानसैरुपचारैरभ्यर्चनं वेश्वरप्रणिधानमस्ति, तथा च श्रुतिरपि– 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥' (श्वेताश्वतरोपनिषद् ६/१८) संसारमोक्षस्थितिबन्धहेतुरूपं परमात्मानं सर्वात्मना शरणं प्रपद्येत मुमुक्षुरित्युपदेशः। 'तमेवैकं जानथात्मानम्' (मुण्डकोपनिषद् २/२/५) इति श्रुतेश्च प्रणिधानस्यो-पदेश: शास्त्रसम्मत इत्यवज्ञायते। एवञ्च– 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद् बहूञ्छब्दान्वाचो विग्लापनं हि तत्॥' (बृहदारण्यकोपनिषद् ४/४/२१), 'तमेव शरणं गच्छ सर्वभावेन भारत।' (श्रीमद्भगवद्गीता १८/६२), 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।' (श्रीमद्भगवद्गीता १८/६६) इत्यादिश्रुतिस्मृतिवचनैरीश्वरप्रणिधानमुपदिष्टम्। 'समाधिसिद्धिरीश्वरप्रणिधानात्।' (योगसूत्रम् २/४५) पतञ्जलिनेश्वरप्रणिधानात् समाधिसिद्धिर्भवतीत्यङ्गीकृतम्।

## ३ आसनम्

आस्यतेऽनेन (प्रकारेण) इत्यासनम्। पतञ्जलिना यथा परिभाषितम्– 'स्थिरसुखमासनम्।' (योगसूत्रम् २/४६) शारीरिकं मानसिकञ्च कष्टं नानुभूयते तदेव सुखमयं शरीरस्थितिरूपमेवासनम्। तथा चोक्तं शङ्कराचार्येणापि– 'सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम्। आसनं तद्विजानीयान्नेतरत्सुखनाशनम्॥' (अपरोक्षानुभूतिः ११२) अर्थाद् यस्यां स्थितौ सुखपूर्वकं निरन्तरमात्मचिन्तनं कर्तुं शक्यते तदेवासनम्, यत्र सुखनाशनं भवति तन्नैवासनमस्ति। योगसूत्रस्य भाष्ये व्यासेनैकादशसङ्ख्यकान्यासनान्युल्लिखितानि, तद्यथा– 'पद्मासनम्, वीरासनम्, भद्रासनम्, स्वस्तिकम्, दण्डासनम्, सोपाश्रयम्, पर्यङ्कम्, क्रौञ्चनिषदनम्, उष्ट्रनिषदनम्, समसंस्थानम्, स्थिरसुखं यथा सुखञ्च इत्येवमादीनि।' (योगसूत्रम् २/४६ : व्यासभाष्यम्, पृ.२६४) सुरेश्वराचार्येणापि कानिचनासनानि परिगणितानि यथा– 'स्वस्तिकं गोमुखं पद्मं हंसाख्यं ब्रह्मनामकम्। नृसिंहं गरुडं कूर्म्मं नागाख्यं वैद्युतासनम्॥ वीरं ममूरवज्राख्यं सिद्धाख्यं रौद्रमासनम्। योन्यासनं विदुः शाक्तं पूर्वपश्चिमतानकम्॥ निरालम्बनयोगस्य निरालम्बनमासने॥' (मानसोल्लास: ९/२४-२६ इति वेदान्तसार:, तत्त्वपारिजात-व्याख्या, पृ.२१७) प्रस्तुतेष्वासनेषु यत्र स्थैर्यस्य सुखस्य चावाप्तिर्भवति तदेवासनं साधकैः स्वीकरणीयम्। पतञ्जलिः प्रयत्नोपरमादासनसिद्धिर्भवतीति सूत्रयति यथा– 'प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्।' (योगसूत्रम् २/४७) आसनसिद्धौ सत्यां शीतोष्णादिभिर्द्वन्द्वै: साधकोऽभिभूतो नैव भवतीति च सूत्रितम्– 'ततो द्वन्द्वानभिघात:।' (योगसूत्रम् २/४८) एवं यत्र कापि पीडा नैवानुभूयते तदेवासनम्। शरीरे मनसि वा यदि कष्टं भवति चेत् तदासनं नैव योगानुकूलमिति ज्ञेयम्।

## ४ प्राणायाम:

श्वासप्रश्वासयोर्निरोध एव प्राणायामः। 'प्राणायामस्तु विज्ञेयो रेचकपूरककुम्भकैः' इत्युक्तेश्च प्राणायामे रेचकपूरक-कुम्भकाख्यास्तिस्रः क्रिया: भवन्ति। श्वासस्य बहिर्निःसरणं रेचकः, श्वासस्यान्तर्नयनं पूरकः, श्वासस्यान्तरेव स्थिरीकरणञ्च कुम्भक इति ज्ञायते। तत्र पतञ्जलिना सूत्रितं यत्– 'तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेद: प्राणायामः।' (योगसूत्रम् २/४९ ) आसने सिद्धे सति बाह्यस्य वायोराचमनरूपो यः श्वास:, कोष्ठगतस्य वायोर्विरेचनरूपो यः प्रश्वासः, तयोर्गतिविच्छेद एव प्राणायाम इत्युच्यते। तथा चोक्तं व्यासेन- 'सत्यासनजये बाह्यस्य वायोराचमनं श्वासः, कौष्ठ्यस्य वायोर्निःसारणं प्रश्वासः, तयोर्गतिविच्छेद उभयाभावः प्राणायामः।' (योगसूत्रम् २/४९ : व्यासभाष्यम्, पृ.२६६) एवं योगशास्त्रे पूरक-कुम्भक-रेचकाख्यास्त्रयः प्राणायामाः प्रसिद्धाः सन्ति। श्वासस्याभ्यन्तरभागे आकर्षणं पूरकप्राणायामः, आकृष्टस्य श्वासस्य निरोधः कुम्भकप्राणायामः, नियमितविधिनावरोधितस्य च श्वासस्य बहिरत्यागो रेचकप्राणायाम इति साधकैरेतासां क्रियाणामभ्यासो गुरुसन्निधावेव करणीयो भवति। शङ्कराचार्येण प्राणायामस्य परम्परितं योगसम्मतं स्वरूपं परित्यज्या-द्वैतसम्मतं स्वरूपं यथा प्रकाशितम्– 'चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्। निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते॥ निषेधनं प्रपञ्चस्य रेचकाख्यः समीरणः। ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः॥ ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राण-संयमः। अयञ्चापि प्रबुद्धानामज्ञानां घ्राणपीडनम्॥' (अपरोक्षानुभूतिः ११८-१२०) अर्थात् चित्तादिसर्वभावेषु ब्रह्म-रूपत्वेन भावनात् सर्ववृत्तीनां यो निरोधः स एव प्राणायाम इत्युच्यते। 'नेति नेति' श्रुत्या सर्वप्रपञ्चस्य निषेधनमेव रेचकाख्यः समीरण इत्युच्यते। 'अहं ब्रह्मस्मीतिवृत्तिरेव पूरकः प्राणायाम इत्युच्यते। अखण्डाकाराकारितायाश्चित्तवृत्तेर्निश्च-लत्वमेव कुम्भकाख्यप्राणायाम इत्युच्यते। अयञ्च प्राणायामः प्रबुद्धानामेवास्ति, अज्ञानाङ्कृते तु घ्राणपीडनमेव प्राणायाम इति। योगशास्त्रेऽद्वैतदर्शने च स्वस्वरूपसाक्षात्कारार्थं चित्तैकाग्र्यार्थं वा प्राणायामस्यातीव महत्त्वपूर्णं स्थानमस्ति।

## ५ प्रत्याहार:

बाह्यविषयेभ्य इन्द्रयाणि समाकृष्य वशीकरणमेव प्रत्याहार इत्युच्यते। 'स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहार:' (योगसूत्रम् २/५४) इति पातञ्जलं सूत्रम्। अस्यैव सूत्रस्य व्याख्यानावसरे व्यासो लिखति-

'स्वविषयसम्प्रयोगाभावे चित्तस्वरूपानुकार इवेति, चित्तनिरोधे चित्तवन्निरूद्धानीन्द्रियाणि, नेतरेन्द्रियजयवदुपायान्तरमपेक्षन्ते। यथा मधुकरराजं मक्षिका उत्पतन्तमनूत्पतन्ति, निविशमानमनुनिविशन्ते, तथेन्द्रियाणि चित्तनिरोधे निरूद्धानि, इत्येष प्रत्याहार:।' (योगसूत्रम् २/५४ : व्यासभाष्यम्, पृ.२८४) अर्थाद् ध्यानावस्थायां यदा चित्तं ध्येयाकारं धारयति, बाह्यरूपरसशब्दादिविषयान् परित्यज्यति तदा चित्तस्य बाह्यविषयसम्बन्धाभावादिन्द्रियाण्यपि तानि विषयाणि नैव गृह्णन्ति, तदा ध्येयस्य ग्रहणमपि नैव कुर्वन्ति, इन्द्रियाणां बाह्यविषयग्रहणस्वभावात्। अतस्तस्मिन् काले सर्वेन्द्रियाणां वृत्तयश्चेतसि विलीयन्ते। तथा चोक्तमाचार्यशङ्करेण- 'विषयेष्वात्मतां दृष्ट्वा मनश्चिति निमज्जनम्। प्रत्याहार: स विज्ञेयोऽभ्यसनीयो मुमुक्षुभि: ॥' (अपरोक्षानुभूति: १२१) समस्तविषयेष्वात्मभावदर्शनं कृत्वा चित्तस्य चिद्घने मज्जनमेव प्रत्याहार इत्युच्यते। तस्मिन् प्रत्याहारे सिद्धे योगिनामिन्द्रियाणि सर्वथा वशानि भवन्ति। अतो वेदान्तयोगदर्शनद्वये मोक्षप्राप्तये समाधिसिद्धये वा प्रत्याहारस्यातीव महत्त्वपूर्णं स्थानमवलोक्यते।

## ६ धारणा

बुद्धिसाक्षित्वेन विद्यमान आत्मनि चित्तनिक्षेपणं धारणेत्युच्यते। तथा चोक्तं नृसिंहसरस्वतिना- 'सर्वेषां बुद्धिसाक्षितया विद्यमानेऽद्वितीयवस्तुनि चित्तनिक्षेपणं धारणा।' पतञ्जलिर्मुनिर्यथा सूत्रयति- 'देशबन्धश्चित्तस्य धारणा।' (योगसूत्रम् ३/१) अर्थाद् हृदयपुण्डरीकाद्याध्यात्मिकदेशे देवमूर्त्यादिबाह्यदेशे वा चित्तवृत्तिस्थापनमेव धारणेत्युच्यते। वेदान्तदर्शनेऽपि ध्येयैकपरब्रह्मणि चित्तवृत्तेः स्थापनमेव धारणेत्यङ्गीक्रियते। तथा चोक्तं शङ्कराचार्येण 'यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात्। मनसो धारणञ्चैव धारणा सा परा मता।' (अपरोक्षानुभूतिः १२२) अर्थान्मनो यत्र यत्र गच्छति तत्र तत्र ब्रह्मणो दर्शनन्तथा तस्मिन् ब्रह्मण्येव मनसो धारणमेव सर्वोत्तमा धारणा विद्यते।

## ७ ध्यानम्

चित्तवृत्तेस्तैलधारावदविच्छिन्नः प्रवाह एव ध्यानमित्युच्यते। महर्षिः पतञ्जलिर्यथा सूत्रयति- 'तत्र प्रत्ययैकतानता ध्यानम्।' (योगसूत्रम् ३/२) अर्थाच्चित्तवृत्तेरेकतानतैव ध्यानमित्युच्यते। इत्थं योगसूत्रे प्रतिपादितं ध्यानस्वरूपमेव वेदान्तसारग्रन्थे सविकल्पसमाधिपदेनाभिव्यक्तम्, तथा हि- 'तत्र सविकल्पो नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा मृन्मयगजादिभानेऽपि मृद्भानवद् द्वैतभानेऽप्यद्वैतं वस्तु भासते।' (वेदान्तसार: ६१, पृ.१९८) तदुक्तम्- 'दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओम्॥' (उपदेशसाहस्री १०/१) वस्तुतो ध्यानस्य परिपक्वावस्थैव सविकल्पसमाधिरस्ति। पुनश्चाचार्येण शङ्करेणोक्तं यत्- 'ब्रह्मैवास्मीति सद्‌वृत्त्या निरालम्बतया स्थितिः। ध्यानशब्देन विख्याता परमानन्ददायिनी॥' (अपरोक्षानुभूतिः १२३) अर्थादहं ब्रह्मैवास्मीति ब्रह्मविषयिण्या निरालम्बतया चित्तवृत्त्या परमानन्ददायिनी स्थितिरेव ध्यानशब्देन विख्याता विद्यते। अष्टाङ्गयोगस्याभ्याससमये बाह्याभ्यान्तरविघ्नानां सम्भावना भवतीति मन्यते। अतिवृष्ट्यनावृष्टिभूकम्परोगाद्याक्रमणादिकं बाह्यविघ्नपदेन ज्ञायते चेदन्त:करणे लयविक्षेपादिदोषा आभ्यन्तरविघ्नपदेन ज्ञायन्ते। मनसि जायमानानां विघ्नानां निवारणं कर्तव्यं भवति। तथा चोक्तं सदानन्देन- 'अस्याङ्गिनो निर्विकल्पस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति। लयस्तावदखण्डवस्त्वनवलम्बेन चित्तवृत्तेर्निद्रा। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यालम्बनं विक्षेपः। लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डस्त्वनवलम्बनं कषायः। अखण्डवस्त्वनवलम्बनेनापि चित्तवृतेः सविकल्पकानन्दास्वादनं रसास्वादः। समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा। अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकसमाधिरित्युच्यते। तदुक्तम- 'लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः। सकषायं विजानीयाच्छमप्राप्तं न चालयेत्॥ नास्वादयेद्रसं तत्र निस्सङ्गः प्रज्ञया भवेत्।' (माण्डूक्यकारिका ३/४४-४५) 'यथा दीपो नीवातस्थो नेङ्गते सोपमा स्मृता।' (गीता ६/१९) एवं ध्येयविषयकस्य प्रत्ययस्यैकतानतैव ध्यानमित्यवबोध्यम्।

## ८ समाधिः

पौरस्त्यदर्शनवाङ्मये समाधेरत्यन्तं महत्त्वमुपपादितम्। 'अथ योगानुशासनम्' (योगसूत्रम् १/१) इति सूत्रस्य भाष्यक्रमे व्यासेन योगः समाधिरित्युक्तम्। अतो योगदर्शनस्य लक्ष्यमेव समाधिरस्तीति ज्ञायते। 'समाधीयतेऽस्मिन् चित्तम्' (सम्+आ+ डु धाञ् धारणपोषणयोरिति धातोः 'कि'प्रत्यये समाधिः) इति समाधिर्व्युत्पाद्यते। एतया व्युत्पत्त्यैकाग्रतया मनसः स्थापनारूपो ध्येयमात्रस्फूरणरूपो वा ध्यानविशेषः समाधिरिति वक्तुमुचितम्। तदुक्तमाचार्यशङ्करेण 'समाधीयतेऽस्मिन् पुरुषोपभोगाय सर्वमिति समाधिः।' (श्रीमद्भगवद्गीता २/४४, शाङ्करभाष्यम्) 'समाधीयते चित्तमस्मिन्निति समाधिरात्मा।' (श्रीमद्भगवद्गीता २/५३, शाङ्करभाष्यम्) एतेन वेदान्तदर्शने समाधिशब्दस्यार्थ आत्मा, परमात्मा वा। तत्र योगदर्शने मनस एकाग्रता ध्येयाकाररूपता वोच्यते। पतञ्जलिना सूत्रितञ्च 'तदेवार्थमात्रनिर्भासं स्वस्वरूपशून्यमिव समाधिः।' (योगसूत्रम् ३/३) अर्थाद् 'ध्यानमेव ध्येयाकारनिर्भासं प्रत्ययात्मकत्वेन स्वरूपेण शून्यमिव यदा भवति ध्येयस्वभावावेशात्तदा समाधिरित्युच्यते।' (योगसूत्रम् ३/३ : व्यासभाष्यम्) अस्यामवस्थायां मनो ध्येयविषये पूर्णतया विलीनं भवति। ध्यानावस्थायां ध्यातृध्येययो: पृथगस्तित्वं विद्यते चेत् समाधौ ध्यातृध्येययोः पृथक्करणं न सम्भवति। ध्येयवस्तुन एवावस्थितिर्जायते। तथा च श्रुतिप्रमाणम्- 'शान्तो दान्त उपरतस्तितिक्षु: समाहितो भूत्वा आत्मन्येवात्मानं पश्यति। (बृहदारण्यकोपनिषद् ४/४/२३), 'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥' (कठोपनिषद् १/२/२३) वस्तुतो ध्येयैकगोचरा चित्तवृत्तिरेव समाधिरस्ति। तदुक्तं विद्यारण्येनापि- 'ध्यातृध्याने परित्यज्य क्रमाद् ध्येयैकगोचरम्। निवातदीपवच्चित्तं समाधिरभिधीयते॥' (पञ्चदशी १/५५) एवं निवातदीपवच्चित्तस्य ध्येयैकगोचरत्वमेव समाधित्वमिति स्पष्टम्। सम्प्रज्ञातासम्प्रज्ञातभेदेन समाधेर्द्वैविध्यं योगदर्शने प्रतिपादितम्।

### ८.१ सम्प्रज्ञातसमाधिः

सम्प्रज्ञातसमाधिः सविकल्पसमाधिपदेनापि कथ्यते। एकाग्रचेतसि प्रमाणादिवृत्तीनां बाह्यविषयाणां निरोध एव सम्प्रज्ञातसमाधिरित्युच्यते। तदुक्तं पतञ्जलिना 'वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः।' (योगसूत्रम् १/१७) तत्रैव व्यासो लिखति-'वितर्कश्चित्तस्य आलम्बने स्थूल आभोग:, सूक्ष्मो विचारः, आनन्दो ह्लादः, एकात्मिका संविद् अस्मिता।' (योगसूत्रम् १/१७ : व्यासभाष्यम्, पृ.४३) एतदनुसारं सम्प्रज्ञातसमाधिरेकाग्रचित्तस्याविचलिताऽक्षुब्धावस्थाऽस्ति। सम्प्रज्ञातसंज्ञा सबीजसमाधिरित्युच्यते, यतो ह्येतदवस्थायां चित्तस्य समाहितत्वे कस्यापि बीजस्यालम्बनमावश्यकं भवति। अस्यामवस्थायां चित्तवृत्तीनां पूर्णतया लयो न भवति। अयं समाधि: सवितर्क-सविचार-सानन्द-अस्मितामात्रभेदेन चतुर्विध इति योगदर्शनेऽङ्गीकृतः। अयमेव सम्प्रज्ञातसमाधिर्वेदान्ते सविकल्पसमाधिनाम्ना वर्णितः। तथा चोक्तं सदानन्देन- 'समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति। तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा मृन्मयगजादिभानेऽपि मृद्भानवद् द्वैतभानेऽप्यद्वैतं वस्तु भासते।' (वेदान्तसार: ६१, पृ.१९८) एवं ज्ञातृज्ञेयज्ञानरूपत्रिपुटेर्भानावस्थैव सविकल्पसमाधिरिति ज्ञायते।

### ८.२ असम्प्रज्ञातसमाधिः

ज्ञातृज्ञानज्ञेयशून्यः समाधिरेवासम्प्रज्ञातसमाधिरित्युच्यते। स च सर्ववृत्तिनिरोधरूपः। अयमेव समाधिर्वेदान्तदर्शने निर्विकल्पसमाधिनाम्नाप्युच्यते। स च संस्कारशेषरूपः समाधिरस्तीति योगदर्शनेऽङ्गीक्रियते। तथा च पतञ्जलिर्मुनि: सूत्रयति- 'विरामप्रत्ययाभ्यासपूर्व:, संस्कारशेषोऽन्यः।' (योगसूत्रम् १/१८) तत्रैव व्यासो भाष्यं लिखति- 'सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसम्प्रज्ञात:, तस्य परं वैराग्यमुपायः। सालम्बनो ह्यभ्यासस्तत्साधनाय न कल्पत इति विरामप्रत्ययो निर्वस्तुक आलम्बनीक्रियते। स चार्थशून्यः, तदभ्यासपूर्वं चित्तं निरालम्बनमभावप्राप्तमिव

भवतीति एष निर्बीजः समाधिरसम्प्रज्ञातः।' (योगसूत्रम् १/१८ : व्यासभाष्यम्, पृ.४७) यदा चित्तं विषयेष्वाकृष्टं न भवति, सा स्थितिर्वैराग्यस्योत्कृष्टावस्था वर्तते। इयमवस्थैव विरामपदस्यार्थः। विषयेष्वनासक्तस्य चित्तस्यैव मोक्षाय प्रवृत्तिर्भवति। अतो विषयेषु वैराग्यमेव चित्तवृत्तिनिरोधस्योपायोऽस्ति । विषयं प्रति चित्तस्य व्यापारप्रवृतिरेव चित्तवृत्तिरस्ति। विषयं प्रति चित्तस्य व्यापारो यद्यपि पूर्णरूपेण समाप्तस्तथापि तस्य संस्कारो नैव निवृत्तश्चेदसम्प्रज्ञातसमाधेः स्वरूपं तदेव। अस्यामेवावस्थायामात्मा स्वविशुद्धस्वरूपे प्रतिष्ठितो भवति। अस्या अवस्थाया नाम कैवल्यस्थितिः। योगस्य परमं ध्येयमेव हि केवलस्यासंपृक्तरूपेणावस्थानम्। कैवल्यरूपस्यासम्प्रज्ञातसमाधेः स्थितिस्तदैव सम्भवति यदा सर्वासां चित्तवृत्तीनां संस्काराणाञ्च निरोधो भवति। निरोधस्य तात्पर्यं प्रत्ययराहित्यमेव न तु निर्बीजत्वम्। अष्टाङ्गयोगस्याभ्यास-समये बाह्याभ्यन्तरविघ्नानां सम्भावना भवतीति मन्यते। अतिवृष्ट्यनावृष्टिभूकम्परोगाद्याक्रमणादिकं बाह्यविघ्नपदेन ज्ञायते चेदन्तःकरणे लयविक्षेपादिदोषा आभ्यन्तरविघ्नपदेन ज्ञायन्ते। मनसि जायमानानां विघ्नानां निवारणं कर्तव्यं भवति। तथा चोक्तं सदानन्देन- 'अस्याङ्गिनो निर्विकल्पस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति। लयस्ताव-दखण्डवस्त्वनवलम्बेन चित्तवृत्तेर्निद्रा। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यालम्बनं विक्षेपः। लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः। अखण्डवस्त्वनवलम्बनेनपि चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसास्वादः। समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा। अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते।' तदुक्तम्-'लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः। सकषायं विजानीयाच्छमप्राप्तं न चालयेत्॥ नास्वादयेद्रसं तत्र निस्सङ्गः प्रज्ञया भवेत्॥' (माण्डूक्यकारिका ३/४४-४५), 'यथा दीपो नीवातस्थो नेङ्गते सोपमा स्मृता।' (श्रीमद्भगवद्गीता ६/१९) सदानन्देनायमेव समाधिर्निर्विकल्पकनाम्नोल्लिखितः- 'निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारिताया-श्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकारा-कारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते। ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति, उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः।' (वेदान्तसारः ६२, पृ.२०२) अर्थाज्ज्ञातृज्ञेयज्ञानादित्रिपुटीनां विलये सति चित्तवृत्तीनामद्वितीयवस्तुन्येकीभाव एव निर्विकल्पकसमाधिरस्ति। सुषुप्तिदशायां समाधिदशायाञ्च वृत्त्यभाने समानेऽपि सद्भावासद्भावमात्रेणानयोर्भेदः स्पष्टः। तथा चोक्तं- 'लीयते हि सुषुप्ते तन्निगृहीतं न लीयते।' (माण्डूक्यकारिका ३/३५) अर्थात् सुषुप्तिदशायां चित्तं स्वकारणेऽज्ञाने विलीनं भवति चेत् समाधिदशायां चित्तं निगृहीतं भवति। सुषुप्तिः खल्वज्ञानमयी विद्यते चेत् समाधिर्विज्ञानमयोऽस्ति। एतस्यामवस्थायामेव जीवः सर्वविधबन्धेभ्यो विमुच्यते, स च कृतकृत्यो भवति। स्वस्वरूपावास्थितिः कैवल्यावाप्तिर्वा योगदर्शनस्याद्वैतदर्शनस्य च चरमोपलब्धिरिति दिक्।

## उपसंहारस्तथा शोधनिष्कर्षः

हिरण्यगर्भाद्युपदिष्टस्य पतञ्जलिमुन्याद्यवबोधितस्य वेदान्तादिदर्शनसमर्थितस्य वैदिकाध्यात्मवाङ्मयरहस्यभूतस्य योगस्याष्टाङ्गान्यत्र सप्रमाणानि निरूपितानि। तत्र यमनियमासनप्राणायामप्रत्याहाराख्यानि बहिरङ्गाणि साधनानि सन्ति। चित्तस्थैर्यद्वारा परम्परया समाध्युपकारकत्वादेतेषां बहिरङ्गत्वं सुनिश्चितम्। तदनुसारमहिंसा सत्यमस्तेयं ब्रह्मचर्यमपरि-ग्रहश्चेत्येते पञ्च यमा विद्यन्ते। तत्र च प्राणवियोगानुकूलो व्यापारो हिंसा, तदभावोऽहिंसेत्युच्यते। सत्यञ्च वाचो मनसश्च यथार्थत्वमुच्यते। परद्रव्यस्यापहरणं स्तेयम्, तदभावोऽस्तेयमित्युच्यते। उपस्थेन्द्रियनियमनं ब्रह्मचर्यमुच्यते। भोगसाधन-वस्तुनामङ्गीकारोऽपरिग्रह इत्युच्यते। शौचं सन्तोषस्तपःस्वाध्याय ईश्वरप्रणिधानञ्चेत्येते योगस्य शास्त्रसम्मताः पञ्च नियमाः सन्ति। तत्र शुचेर्भावश्शौचम्, शुद्धिरित्यर्थ। तच्च शौचं शारीरं मानसञ्चेति द्विविधम्। शारीरं शौचञ्च बाह्य-मान्तरञ्चेति पुनर्द्विविधम्। मृज्जलादिभिः शरीरप्रक्षालनं बाह्यमस्ति चेत् पञ्चगव्यादिभक्षणेनान्तरम्। सम्यग्भावनया मनो-

मलानां रागद्वेषादीनां क्षालनं मानसं शौचमुच्यते । सन्तोषश्च तृष्णाक्षयोऽस्ति। चित्तप्रसादाविरोधिशास्त्रोपदिष्टमुपवासादिकं तप इत्युच्यते। प्रणवादिजयो मोक्षशास्त्राध्ययनं वा स्वाध्याय इत्युच्यते। परमेश्वरचिन्तनन्तत्र सर्वकर्मसमर्पणञ्चेश्वर-प्रणिधानमित्युच्यते। स्थिरं सुखावहञ्च यत् तदेवासनम्, तच्च पद्मासनादिकं हस्तपादाद्यवयवावस्थानरूपम्। आसन-स्थैर्याच्च शीतोष्णादिपीडा नैव भवति। श्वासप्रश्वाससमये वायोः स्वाभाविकी या गतिस्तस्या निरोध एव प्राणायामोऽस्ति। तत्र नासापुटेन वायोरन्तःप्रवेश: श्वासः, ततो बहिर्निर्गम: प्रश्वास: । प्राणायामेन च निश्चलं चित्तं रूपरसगन्धस्पर्शशब्दादि-विषयैर्न संयुज्यते, ततश्च चक्षु:श्रोत्रादीनीन्द्रियाण्यपि रूपशब्दादिविषयैर्नैव संयुज्यन्ते। तदानीं तानि सर्वाणीन्द्रियाणि केवलं चित्तस्वरूपानुकारीणि भवन्ति, अयमेव प्रत्याहार इत्युच्यते। अष्टसु योगाङ्गेष्वेतेषां यमनियमासनप्राणायामप्रत्याहार-रूपाणां पञ्चानां बहिरङ्गाणां साधनानामूहापोहरूपेणात्र स्वरूपं निरूपितम्। समाधिस्वरूपनिष्पादनाद् धारणाध्यान-समाधिरूपाणि त्रीणि च समाधिरूपयोगस्यान्तरङ्गाणि साधनानि प्रोच्यन्ते। यत्र हृत्पुण्डरीकादिरूपे देशे ध्येयं तत्र देशे चित्तस्यैकाग्रतैव धारणेत्युच्यते। ध्यानञ्च निर्विषयकं मन इत्युच्यते, अर्थाद् वृत्त्यन्तराव्यवहितो ध्येयाकारो मनसो वृत्तिप्रवाहो ध्यानमित्यङ्गीक्रियते। ध्यानञ्चैतद् यदा ध्येयमात्राकारं ध्यानध्यातृदृष्टिशून्यं भवति तदा तदेव समाधि-रित्यभिधीयते। स च समाधिः संप्रज्ञातोऽसंप्रज्ञातश्च द्विविधो मन्यते। संशयविपर्ययराहित्येन यत्र ध्येयस्वरूपं सम्यक् प्रज्ञायते स सम्प्रज्ञातः समाधिरित्युच्यते। असंप्रज्ञाते तु ध्येयाद् ध्येयस्य भेदोऽपि नैव भासते, तत्र ध्येयाकारवृत्तेरपि निरोधात्। वस्तुतः समाधिरेव योगो विद्यते। धारणाध्यानसमाधिरूपस्यान्तरङ्गसाधनत्रयस्यैकविषयस्य योगवेदान्तादिदर्शने संयम इति पारिभाषिकी संज्ञा प्रदत्ता विद्यते। तस्य च संयमस्य मुख्यं फलं समाधिरूपयोगोऽस्ति चेदवान्तरफलञ्च विभूतयः सिद्धयो वा। योगविद्यायां पारङ्गते यतिजने भूतभविष्यदर्थज्ञानम्, जन्मान्तरस्मरणम्, पशुपक्ष्यादिशब्दावबोधः, परमनो-गतार्थज्ञानम्, अन्तर्धानञ्चेत्याद्या विभूतयः सम्भवन्तीति योगशास्त्रस्य सिद्धान्तः। किं बहुना सोऽयं योगवृक्षश्चित्तभूमौ यम-नियमाभ्यां प्राप्तबीज आसनप्राणायामाभ्यामङ्कुरितः प्रत्याहारेण कुसुमितोऽन्तरङ्गसाधनैर्धारणाध्यानसमाधिभिर्फलितो भवतीति निष्कर्षः। अस्याध्ययनस्याधारेण निम्नलिखितनिष्कर्षा: सम्प्राप्ता:–

१. अष्टाङ्गयोग: पौरस्त्यदर्शनपरम्पराया: समग्रमानवविकासप्रधानोऽनुशासितः साधनमार्गो विद्यते।
२. योगो वेदान्तदर्शनस्य नैव विरोधी, अपि तु पूरकसाधनमार्गो विद्यते।
३. यम-नियमादयो नैतिकमूल्यान्याधुनिकसमाजस्य पुनर्निर्माणायात्यन्तावश्यकानि विद्यन्ते।
४. ध्यानप्राणायामादयो मानसिकस्वास्थ्यरक्षणे प्रभावपूर्णा उपाया विद्यन्ते।
५. समाधिरात्मसाक्षात्कारस्य परमानन्दानुभूतिरूपावस्थास्ति, या वेदान्तस्य ब्रह्मज्ञानस्य तुल्या विद्यते।
६. योगस्य केवलं शारीरिकव्यायामरूपेण प्रस्तुतिस्तस्य सङ्कुचिता व्याख्याऽस्ति।
७. आधुनिकेऽस्मिन् विश्व आध्यात्मिकशास्त्रे, नैतिकाध्यात्मिकपुर्नजागरणस्य, मानसिकसन्तुलनस्य च कृते-ऽष्टाङ्गयोगोऽत्यन्तप्रासङ्गिको विद्यते। अतो निष्कर्षतया वक्तुं शक्यते यदष्टाङ्योगो न केवलं पौरस्त्या-ध्यात्मिकसाधनापद्धतिरपि त्वाधुनिकमानवजातेरपि मार्गदर्शकं सार्वभौमं दर्शनमस्ति। जयतु पौरस्त्यदर्शनम्! जयत्वष्टाङ्गयोगसिद्धान्त:।

## सन्दर्भग्रन्थसूची


अपरोक्षानुभूति (२०४५, वेदान्तसन्दर्भमा सङ्गृहीत), शङ्कराचार्य, वाराणसी : महेश अनुसन्धान संस्थान।

ईशादि नौ उपनिषद् (२०६८), शङ्कराचार्यः, शाङ्करभाष्येण, हिन्द्यनुवादेन च समन्विता, गोरखपुर : गीताप्रेस।

उपदेशसाहस्री (२०४५, वेदान्तसन्दर्भमा सङ्गृहीत), शङ्कराचार्य, वाराणसी : महेश अनुसन्धान संस्थान।

तुलनात्मकदृशा दर्शनान्तराद्वैतदर्शनाभिमतमोक्षतत्त्वविवेकः (२०८०), घिमिरे, उमेशप्रसादः, (अप्र. वि. शो.) अनुसन्धानकेन्द्रम्, नेपाल-संस्कृतविश्वविद्यालयः।

पातञ्जल योगदर्शन (ई.२०१४), पतञ्जलिः, व्यासभाष्य तथा हिन्दी व्याख्यासहित, (हि.व्या.आरण्य हरिहरानन्दः), वाराणसी : मोतीलाल वनारसीदास।

पूर्वीयदर्शनमा मोक्षचिन्तन (२०७३), घिमिरे, उमेशप्रसादः, रामेछाप : उमेशप्रसाद घिमिरे।

पौरस्त्यदर्शन : एक चिनारी (२०७४), भट्टराई, पद्मप्रसादः, काठमाडौँ : विद्यार्थी पुस्तक भण्डार।

बृहदारण्यकोपनिषद् (२०६८), शङ्कराचार्यः, शाङ्करभाष्येण, हिन्द्यनुवादेन च समन्विता, गोरखपुर : गीताप्रेस।

ब्रह्ममीमांसासूत्रम् (ई.२००२), कौण्डिन्यायनः, शिवराज आचार्य, शाङ्करभाष्यानुकुलया कौण्डिन्न्यायनवृत्त्या संवलितम् हिन्दिभाषानुवादसहितम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

भारतीयतत्त्वमीमांसा (ई.२००७), अधिकारी, हरिप्रसादः, वाराणसी : नवशक्ति-प्रकाशनम्।

मनुस्मृतिः (ई.१९७४), मनुः, सम्पा. शास्त्री, हरगोविन्द, वाराणसी : चौखम्बा संस्कृत सिरिज अफिस।

महाभारत (२०७२), व्यासः (हिन्दिटीकासहित), गोरखपुर : गीताप्रेस।

माण्डुक्योपनिषद् एवम् माण्डुक्यकारिका (२०५६), गीरि रामानन्द, देवघाट : महेश सन्न्यास आश्रम।

योगदर्शनम् (२०६७), पतञ्जलिः, हिन्दिव्याख्याकार : शास्त्री उदयवीर, नई दिल्ली : विजयकुमार गोविन्दराम हासानन्दः।

विष्णुपुराणम् (१९६७), मुम्बयी : वेङ्कटेश्वरयन्त्रालयः।

विवेकचूडामणिः (२०६९, ४२ औँ पुनर्मुद्रण), गोरखपुर : गीताप्रेस।

वेदान्तपरिभाषा (२०८२), सम्पा. कौण्डिन्न्यायन, सुमोदवर्धन, काठमाण्डौ : वेदान्तविभाग, वाल्मीकि विद्यापीठ।

वेदान्तसन्दर्भः (२०४५), शङ्कराचार्यः, वाराणसी : महेश-अनुसन्धान संस्थानम्।

वेदान्तसारः (ई.१९७२), सदानन्दः, विद्वन्मनोरञ्जनीटीकासहितः, व्या.- यतिः, रामतृप्तः, वाराणसी : चौखम्बा अमरभारती प्रकाशन।

वेदान्तसारः (ई.१९७९), सदानन्दः, व्याख्याकारः शुक्लः, बदरीनाथः, वाराणसी : मोतीलाल वनारसीदास।

वेदान्तसारः (ई.१९८३), सदानन्दः, हि.व्या., श्रीवास्तवः, सन्तनारायणः, हिन्दीरूपान्तर-तत्त्वपारिजातव्याख्यासंवलितः, इलाहावाद : पीयूष प्रकाशन।

वेदान्तसिद्धान्तः (२०७१), घिमिरे, उमेशप्रसादः, रामेछाप : नीतु घिमिरे।

शब्दकल्पद्रूमः (ई.२००२) (सम्पा.), देवराजः, रमाकान्तः, दिल्ली : राष्ट्रिय संस्कृत संस्थान।

शाङ्करवेदान्तकोशः (ई.१९९८), पाण्डेयः, मुरलीधरः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

श्रीमद्भगवद्गीताभाष्यम् (२०७२), शङ्कराचार्यः, वाराणसी : श्रीदक्षिणामूर्तिप्रकाशनम्।

षड्दर्शनीसङ्ग्रहः (ई.२००२), (सम्पा.), घिमिरे, दीर्घराजः, दाङ : महेन्द्रसंस्कृत विश्वविद्यालयः।

सर्वदर्शनसङ्ग्रहः (ई. २००४), माधवाचार्यः, हि.व्या.शर्मा, उमाशङ्कर, वाराणसी : चौखम्बा विद्याभवन ।

सर्वदर्शनसङ्ग्रहः (ई. १९५१), माधवाचार्यः,वासुदेवशास्त्रिविरचितदर्शनाङ्कुराभिधव्याख्ययासहितः, भारतः : प्राच्यविद्यासंशोधनमन्दिरम्।